TECHE
UDINE

MANOSCRITTI

FONDO PRINCIPALE

Manoscritto n. **P_MSS_4319**

Nel Fondo Principale sono confluiti la maggior parte dei lasciti manoscritti pervenuti alla Biblioteca Civica «Vincenzo Joppi» nel corso del tempo: si tratta perciò di un fondo composito nel quale è possibile trovare manoscritti di argomento liturgico, scientifico, giuridico, botanico e altro.

Collocazione:

Biblioteca Civica "Vincenzo Joppi", Udine
https://www.techeudine.it/fondo-principale
https://www.sbhu.it/

[illegible]

॥६०५ सद्दर्शनं जिनं नत्वा वीरं स्याद्वाददेशकं । सर्वदर्शनवाच्योऽर्थः संक्षेपेण निगद्यते ॥१॥ दर्शनानि षडेवात्र मूलभेदव्यपे-
क्षया । देवतातत्त्वभेदेन ज्ञातव्यानि मनीषिभिः ॥२॥ बौद्धं नैयायिकं सांख्यं जैनं वैशेषिकं तथा । जैमनीयं च नामा-
नि दर्शनानाममून्यहो ॥३॥ तत्र बौद्धमते तावद् देवता सुगतः किल । चतुर्णामार्यसत्यानां दुःखादीनां प्ररूपकः ॥४॥ दुःखं सं-
सारिणः स्कंधाः ते च पंच प्रकीर्त्तिताः । विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च ॥५॥ पंचेंद्रियाणि शब्दाद्या विषयाः पंच मान-
सं । धर्मायतनमेतानि द्वादशायतनानि च ॥६॥ समुदेति यतो लोके रागादीनां गणोऽखिलः । आत्मात्मीयस्वभावा-
ख्यः स स्यात् समुदयः पुनः ॥७॥ क्षणिकाः सर्वसंस्कारा इत्येवं वासना तु या । स मार्ग इह विज्ञेयो निरोधो मोक्ष उच्यते ॥८॥
प्रमाणे द्वे च विज्ञेये तथा सौगतदर्शने । प्रत्यक्षमनुमानं च सम्यग्ज्ञानं द्विधा यतः ॥९॥ प्रत्यक्षं कल्पनापोढमभ्रांतं तत्र बुध्यतां ।
त्रिरूपाल्लिंगतो लिंगिज्ञानं तु अनुमानसंज्ञितं ॥१०॥ रूपाणि पक्षधर्मत्वं सपक्षे विद्यमानता । विपक्षे नास्तिता हेतोरेवं त्रीणि विभाव-
येत् ॥११॥ बौद्धराद्धांतवाच्यस्य संक्षेपोऽयं निवेदितः । नैयायिकमतस्येतः कथ्यमानो निशम्यतां ॥१२॥ अक्षपादमते देवः सृष्टिसंहारकृच्छि-

[illegible]

[illegible]

ऽत्र विभुर्नित्यैकसर्वज्ञो नित्यबुद्धिसमाश्रयः॥१३॥ तत्त्वानि षोडशामुत्र प्रमाणादीनि तद्यथा। प्रमाणं च प्रमेयं च संशयश्च प्रयोजनं॥१४॥
। दृष्टांतोप्यथ सिद्धांतो ऽवयवास्तर्कनिर्णयौ। वादो जल्पो वितंडा च हेत्वाभासाश्छलानि च॥१५॥ जातयो निग्रहस्थानान्येषामेवं प्र
रूपणा। अर्थोपलब्धिहेतुस्यात्प्रमाणं तच्चतुर्विधं॥१६॥ प्रत्यक्षमनुमानं चोपमानं शाब्दिकं तथा। तत्रेंद्रियार्थसंपर्कोत्पन्नम
व्यभिचारि च॥१७॥ व्यवसायात्मकं ज्ञानं व्यपदेश्यवि॥ वर्जितं। प्रत्यक्षमनुमानं तु तत्पूर्वं त्रिविधं तावत्॥१८॥ पूर्ववच्छेष
वच्चैव दृष्टं सामान्यतस्तथा। तत्राद्यं कारणात्कार्य मनुमानमिहेष्यते॥१९॥ यथा रोलंबगवलव्यालतमा
लमलिनत्विषः। वृष्टिं व्यभिचरंतीह नैवं प्रायाः पयो मुचः॥२०॥ कार्यात्कारणानुमानं यच्च तच्छेषवन्मतं। तथाविधन
दीपूरान्मेघो दृष्टो यथोपरि॥२१॥ यच्च सामान्यतो दृष्टं त देवं गतिपूर्विका। पुंसि देशांतरप्राप्तिर्यथा सूर्येपि सा तथा॥२२॥ प्रसिद्ध
वस्तुसाधर्म्यादप्रसिद्धस्य साधनं। उपमानं समाख्यातं यथा गौर्गवयस्तथा॥२३॥ शाब्दमाप्तोपदेशस्तु मानमेवं चतुर्विधं। प्रमेयं
त्वात्मदेहाद्यं बुद्धींद्रियसुखादि च॥२४॥ किमेतदिति संदिग्धः प्रत्ययः संशयो मतः। प्रवर्तते यदर्थित्वात्तत्तु साध्यं प्रयोजनं॥२५॥ दृष्टां

[illegible]

[illegible]

तस्तु भवेदेष विवादविषयो न यः। सिद्धांतस्तु चतुर्भेदः सर्वतंत्रादिभेदतः॥२६॥ प्रतिज्ञाहेतुदृष्टांतोपनया निगमस्तथा। अवयवाः
पंच तर्कः संदेहोपरमे भवेत्॥२७॥ यथा काकादिसंपातात् स्थाणुना भाव्यमत्र हि। ऊर्ध्वं संदेहतर्काभ्यां प्रत्ययो निर्णयो मतः॥
२८ आचार्यशिष्ययोः पक्षप्रतिपक्षपरिग्रहाद्याक थाभ्यासहेतुस्यादसौ वाद उदाहृतः॥२९॥ विजिगीषुकथा यात्र छल
जात्यादिदूषणा। स जल्पः सा वितंडा या प्रतिपक्ष वर्जिता॥३०॥ हेत्वाभासा असिद्धाद्याश्छलं कूपो नवोदकः। जातयो दूष
णाभासाः पक्षादिर्दूष्यते यया॥३१॥ निग्रहस्था नमाख्यातं परो येन निगृह्यते। प्रतिज्ञाहानिसंन्यासविरो
धादिविभेदतः॥३२॥ नैयायिकमतस्यैष समासः कथितोंऽजसा। सांख्याभिमतभावानामिदानीमयमुच्यते॥३३॥ सां
ख्या निरीश्वराः केचित् केचिदीश्वरदेवताः। सर्वेषामपि तेषां स्यात्तत्त्वानां पंचविंशतिः॥३४॥ सत्वं रजस्तमश्चेति ज्ञेयं तावद्गु
णत्रयं। प्रसादतापदैन्यादिकार्यलिंगं क्रमेण तत्॥३५॥ एतेषां या समावस्था सा प्रकृतिः किलोच्यते। प्रधानाव्यक्तशब्दा
भ्यां वाच्या नित्यस्वरूपिका॥३६॥ ततः संजायते बुद्धिर्महानिति यकोच्यते। अहंकारस्ततोपि स्यात्तस्मात् षोडशको गणः

[illegible]

[illegible]

॥३७॥ स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रं च पंचमं। पंच बुद्धींद्रियाण्यत्र। तथा कर्मेंद्रियाणि च॥३८॥ पायूपस्थवचःपाणिपादाख्यानि
मनस्तथा। अन्यानि पंचरूपादि मात्राणीति षोडश॥३९॥ रूपात्तेजो रसादापो गंधाद्भूमिः स्वरान्नभः। स्पर्शाद्वायु
स्तथैवं च पंचभ्यो भूतपंचकं॥४०॥ एवं चतुर्विंशतितत्त्वरूपं निवेदितं सांख्यमते प्रधानं। अन्यस्त्वकर्ता विगुणश्च भोक्ता तत्त्वं पुमा
न्नित्यचिदभ्युपेतः॥४१॥ पंचविंशतितत्त्वानि संख्य[illegible] स्त्विदं तु च। प्रधाननरयोश्चात्र वृत्तिः पंग्वंधयोरिव॥४२॥ प्रकृति
वियोगो मोक्षः पुरुषस्यैवांतरं ज्ञानात्। मानत्रितयं चात्र प्रत्यक्षं लैङ्गिकं शाब्दं॥४३॥ एवं सांख्यमत
स्यापि समासो गदितोऽधुना। जैनदर्शनसंक्षेपः कथ्यते सुविचारवान्॥४४॥ जिनेंद्रो देवता तत्र रागद्वेषविव
र्जितः। हतमोहमहामल्लः केवलज्ञानदर्शनः॥४५॥ सुरासुरेंद्रसंपूज्यः सद्भूतार्थप्रकाशकः। कृत्स्नकर्मक्षयं कृत्वा
संप्राप्तः परमं पदं॥४६॥ जीवाजीवौ तथा पुण्यं पापमाश्रवसंवरौ। बंधश्च निर्जरामोक्षौ नव तत्त्वानि तन्मते॥४७॥ तत्र ज्ञानादि
धर्मेभ्यो भिन्नाभिन्नो विवृत्तिमान्। शुभाशुभकर्मकर्ता भोक्ता कर्मफलस्य च॥४८॥ चैतन्यलक्षणो जीवो यश्चैतद्विपरी

[illegible]

[illegible]

तवान्। अजीवः स समाख्यातः पुण्यं सत्कर्मपुद्गलाः॥४९॥ पापं तद्विपरीतं तु मिथ्यात्वाद्यास्तु हेतवः। यैर्बंधः स विज्ञेय आश्रवो जि
नशासने॥५०॥ संवरस्तन्निरोधस्तु बंधो जीवस्य कर्मणः। अन्योन्यानुगमात्मा तु यः संबंधो द्वयोरपि॥५१॥ बद्धस्य कर्मणः सा
टो यस्तु सा निर्जरा मता। आत्यंतिको वियोगस्तु देहा देर्मोक्ष उच्यते॥५२॥ एतानि नव तत्त्वानि यः श्रद्धत्ते स्थिरा
यः। सम्यक्त्वज्ञानयोगेन तस्य चारित्रयोग्यता॥५३॥ [illegible] तज्जितयं स्यात तत्सम्यग्ज्ञानक्रि
याभ्यां। ज्ञायते मोक्षमार्गः॥५४॥ प्रत्यक्षं च पर
[illegible]
रोक्षं च द्वे प्रमाणे तथा मते। अनंतधर्मकं वस्तु प्रमाण
विषयस्त्विह॥५५॥ अपरोक्षतयार्थस्य ग्राहकं ज्ञानमीदृशं। प्रत्यक्षमितरज्ज्ञेयं परोक्षं ग्रहणेक्षया॥५६॥ येनो
त्पादव्ययध्रौव्ययुक्तं यत्सदिष्यते। अनंतधर्मकं वस्तु तेनोक्तं मानगोचरः॥५७॥ जैनदर्शनसंक्षेप इत्येष गदि
तोऽनघः। पूर्वापरविघातो न यत्र क्वापि निगद्यते॥५८॥ [illegible] विद्यापिका [illegible]
[illegible]॥५९॥ [illegible] तन्मते॥६०॥ तत्र

[illegible]

[illegible]

[illegible]

...कालदिगात्ममनांसि च। गुणाः पुनः पंचविंशतिधा॥६१॥ रूपरसगंधस्पर्शाः संख्याविभागसंयोगौ। परिमाणं च पृथक्त्वं तथा परत्वापरत्वे च॥६२॥ बुद्धिः सुखदुःखेच्छाधर्माधर्मप्रयत्नसंस्काराः। द्वेषः स्नेहगुरुत्वे द्रवत्ववेगौ गुणा एते॥६३॥ उत्क्षेपावक्षेपावाकुंचनकं प्रसारणं गमनं। पंचविधं कर्मैतत् परापरे द्वे तु सामान्ये॥६४॥ तत्र परं सत्ताख्यं द्रव्यत्वाद्यपरमथ विशेषस्तु। निश्चयतो नित्यद्रव्यवृत्तिरन्त्यो विनिर्दिष्टः॥६५॥ य इहायुतसिद्धानामाधाराधेयभूतभावानां। संबन्ध इहप्रत्ययहेतुः स च भवति समवायः॥६६॥ प्रमाणं च द्विधामीषां प्रत्यक्षं लैंगिकं तथा। वैशेषिकमतस्यैष संक्षेपः परिकीर्तितः॥६७॥ जैमिनीयाः पुनः प्राहुः सर्वज्ञादिविशेषणः। देवो न विद्यते कोऽपि यस्य मानं वचो भवेत्॥६८॥ तस्मादतींद्रियार्थानां साक्षाद्द्रष्टुरभावतः। नित्येभ्यो वेदवाक्येभ्यो यथार्थत्वविनिश्चयः॥६९॥ अत एव पुरा कार्यो वेदपाठः प्रयत्नतः। ततो धर्मस्य जिज्ञासा कर्तव्या धर्मसाधनी॥७०॥ नोदनालक्षणो धर्मो नोदना तु क्रियां प्रति। प्रवर्तकं वचः प्राहुः स्वःकामोऽग्निं यजेत॥७१॥ प्रत्य

[illegible]

[illegible]

[illegible]

[illegible]

क्षमनुमानं च शाब्दं चोपमया सह। अर्थापत्तिरभावश्च षट् प्रमाणानि जैमिनेः॥७२॥ तत्र प्रत्यक्षमक्षाणां संप्रयोगे सतां सति। आत्मनो बुद्धिजन्मेत्यनुमानं लैंगिकं पुनः॥७३॥ शाब्दं शाश्वतवेदोत्थमुपमानं तु कीर्तितं। प्रसिद्धार्थस्य साधर्म्यादप्रसिद्धस्य साधनं॥७४॥ दृष्टार्थानुपपत्त्या तु कस्याप्यर्थस्य कल्पना। क्रियते यद्बलेनासावर्थापत्तिरुदाहृता॥७५॥ प्रमाणपंचकं यत्र वस्तुरूपे न जायते। वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता॥७६॥ जैमिनीयमतस्यापि संक्षेपोऽयं निवेदितः। एवमास्तिकवादानां कृतं संक्षेपकीर्तनं॥७७॥ नैयायिकमतादन्ये भेदं वैशेषिकैः सह। न मन्यन्ते मते तेषां पंचैवास्तिकवादिनः॥७८॥ षड्दर्शनसंख्या तु पूर्यते तन्मते किल। लोकायतमतक्षेपे कथ्यते तेन तन्मतं॥७९॥ लोकायता वदन्त्येवं नास्ति जीवो न निर्वृतिः। धर्माधर्मौ न विद्येते न फलं पुण्यपापयोः॥८०॥ एतावानेव लोकोऽयं यावानिन्द्रियगोचरः। भद्रे वृकपदं पश्य यद्वदन्त्यबहुश्रुताः॥८१॥ पिब खाद च चारुलोचने यदतीतं वरगात्रि तन्न ते। न हि भीरु गतं निवर्तते समुदयमात्रमिदं कलेवरं॥८२॥ पृथ्वी जलं तथा तेजो वायुर्भूतचतुष्टयं। चैतन्यभूमिरेतेषां मानं त्वक्षजमेव हि॥८३॥ पृथ्व्यादिभूतसंहत्या तथा देहपरीणतेः। मदशक्तिः सुरांगेभ्यो यद्वत्तद्वच्चिदात्मनि...

[illegible]

[illegible]

ट [illegible] प्रतिपेदिरे [illegible] ॥ [illegible]
[illegible]
[illegible] एवं षड्दर्शन [illegible]
[illegible] षड्दर्शनसमुच्चय [illegible] ॥

प्रतिपेदिरे॥८७॥ साध्यवृत्तिनिवृत्तिभ्यां या प्रीतिर्जायते जने। निरर्था सा मते तेषां सा धर्मः कामात्परो नहि॥८८॥ लोकायित
मते त्वेवं संक्षेपोऽयं निवेदितः। अभिधेयतात्पर्यार्थः पर्यालोच्यः सुबुद्धिभिः॥८९॥ इति श्रीषट्दर्शनसमुच्चयः समाप्तः॥छ॥